THE ORIENTAL THOUGHT SERIES

General Editor :—

DR. G. V. DEVASTHALI
M.A., B.T., Ph.D.

No. 4

महामुद्गलभट्टविरचितं

रामार्याष्टोत्तरशतम् ॥

Edited by

DR. G. V. DEVASTHALI
M.A., B.T., Ph.D.



NASIK, January 1956

INTRODUCTION

The present edition of the Ramāryāṣṭottara-śata of Mahāmudgala Bhaṭṭa is based on five MSS. which are named A, B, C, D and E respectively.

A. this is a complete MS. having 20 folios with a fly-leaf at either end. The fly-leaves read ॥ अथ रामार्या प्रारम्भ ॥ श्री ॥ and इति रामार्या संपूर्ण ॥. All the folios have margins on either side in red ink. The MS. begins on fol. 1a and ends on fol. 20 b. The obeisance in the beginning and the colophon at the end as also the lines marking the end of the आर्याs and their halves are in red ink. Fol. 10 is slightly burnt on the right side; but no damage is done to the text except for one letter. The MS. is written not very accurately; but very few corrections have been introduced and these also are not always correct. Size $5\frac{3}{4}'' \times 4''$; 7 lines in a page and 15 letters in a line. The MS. is not dated; but it is about 150 years old.

B. This is another complete MS. written on two long sheets on either side. The verso of the second sheet contains आर्याs 99 to the end which are written about the middle of the sheet, the space above and below this being left blank. Both the sheets are very much worn out on all sides and the first sheet has actually broken into two. The MS. is, on the whole, more accurately written than the others collated for this edition. And even where there are inaccuracies, they are in several places corrected by the scribe himself. Size $16\frac{1}{2}'' \times 5\frac{3}{4}''$ 45 lines in a page and about 30 letters in a line. This MS. also has no date, though it must be, judging from its present condition, about the same age as A above, if not older still.

C. This MS. is defective at either end and has fol. 9 missing. Thus out of its eleven folios, now we have only eight. It is nicely written and is accurate on the whole. In a few places some corrections have been introduced by some one who is not always identical with the scribe. Owing to the loss of

three folios, this MS. has आर्याs Nos. 4–81 and 97–108, & parts of आर्याs 3, 82 and 109. The colophon along with almost the whole of the last आर्या is missing. This MS. along with B forms an almost sure guide for the critical reading of the text. Size $8\frac{1}{4}'' \times 5\frac{1}{2}''$; 10 lines in a page and 25 letters in a line. It looks more than a hundred years old.

D. This MS. has 3 folios and a blank leaf at the end. It is incomplete and has only 34 आर्याs written in tolerably legible hand, though not quite accurately. The figures indicating the number of the आर्याs are marked red on foll. I and 2, up to 26th आर्या; but not on the third folio which is left blank on the verso. The text is copied on European paper, bluish in colour and having water-marked lines and a medal with Queen Victoria thereon. This is enough to show the age of the MS. Size $10\frac{1}{2}'' \times 4''$; 9 lines in a page; 45 letters in a line.

E. This MS. also is incomplete. But it contains a commentary along with the text as far as it goes. The आर्या forming the text is written about the middle of the page and has the commentary above and below it. Both the text and the commentary are written in bold Devnāgarī characters and almost accurately too. Size $11\frac{3}{4}'' \times 4\frac{1}{2}''$; 8 lines in a page; 38 letters in a line.

As already noted above two of these MSS. viz. A and B contain the full text; C has a few आर्याs missing, though otherwise it has proved to be of great value for this edition; while the rest are fragmentary and have contributed only a few readings in this edition. MSS. A and C belong to the editor himself; while the others are borrowed from the collection of MSS. at the Nasik Oriental Reserch Institute which has been carrying on its work for the last two years.

As is but usual with our ancient Sanskrit authors, the author of the present work also is reticent about himself and gives us no information beyond his name Mahāmudgala Bhaṭṭa (or sūri).

(to be continued in the next number)

॥ श्रीः ॥

महामुद्गलभट्टविरचितं
रामार्याष्टोत्तरशतम् ॥

त्वयि विमुखे मखमुख्ये सख्येनान्यस्य कस्य जीवामि ।
जीवामि तु भवदर्पितवसनाशनमात्रजीवनाः सर्वे ॥१॥
परितः पश्यसि परितः शृणोषि परितो जगद् विजानासि ।
मां राम किं तदन्तर्न शृणोषि न वीक्षसे[1] न वा वेत्सि ॥२॥
जानाति भूपमल्पो नाल्पं जानाति भूप इत्येतत् ।
उचितं सकलमविज्ञे सर्वज्ञे त्वय्यदः कथं श्लाघ्यम् ॥३॥
अर्थिनि विलसति लिप्सा दातरि दित्सा तु दूरतोऽपास्ता ।
आस्तां कृपणकथेयं रमापते राम नोचिता भवति ॥४॥
अपि रङ्कमङ्कनिष्ठः प्रार्थयमानोऽर्भको[2] लभेतेष्टम् ।
कष्टं वत जगदुद्भव भवदङ्कगतो लभे न तद् भवतः ॥५॥
आशापाशनिबद्धं कारागारे कलेवरे निहितम् ।
यदि[3] मोचयसि न मां त्वं कुरु तर्हि स्वात्मनैव मे वृत्तिम् ॥६॥
अनुचितमिदमेवादौ श्रीमद्द्वारि[4] स्थितोऽप्यहं दीनः[5] ।
व्यथयति कथं न हि त्वां मम वृत्तिस्तदनु मानवाधीना ॥७॥
त्रिभुवनपालनदीक्षित रक्षणशक्तिस्तवापीयम्[6] ।
सामान्यमिव विशेषं किं मां परिहृत्य सर्वतः स्फुरति[7] ॥८॥
यदि पुनरपराधानां कोटिभिरन्तर्विषादमायासि ।
पत्ताडितापि बालै[8] रुष्यति किमितीह मानुषी जननी ॥९॥

---

1. वीक्ष्यस D. 2. °भे E (the commentator reads °भकः i. e. °भको as we have it in other Mss.) 3. यदि न मोचयसि मां त्वं D. 4. °रे D. 5. दीनम् B. 6. °स्तथा° C. 7. °ष्यं E (which is adopted in the commentary also). 8. बालैस्तुष्यति DE; बालै हृष्यति B.

[9]अयि वद राघव तथ्यं कोपोऽयं केन मदपराधेन ।
शपथस्ते दाशरथे दशरथपदयोर्यदन्यथा ब्रूषे ॥१०॥
मामिह कृपणमनाथं क्लेशैर्व्याप्तं रमेश निःशेषैः ।
लोलद्भुजपदमस्तकमवलोक्य कथं स्थितोऽसि तूष्णीं त्वम् ॥११॥
करुणाकर इत्याद्या न [10]रथैरपि याति बिरुदमाला ते ।
शरणागतमतिकृपणं किं मां समुपेक्षसे रघूत्तंस ॥१२॥
कुरु वा राघव करुणां मयि दीने त्वां शरणमापन्ने ।
शरणागतवत्सल इति विष्टपगीतं जहीहि वा बिरुदम् ॥१३॥
सेवामपेक्ष्य दाता नहि दाता किन्तु वेतनादाता ।
सेवाहीने दीने पल्वल इव धेहि जीवनं घनवत् ॥१४॥
सेवकवंशभवत्वादपेक्षसे चेन्मया कृतां सेवाम् ।
अलसं सेवकसुतमपि राघव परिपालयन्ति [11]पृथ्वीशाः ॥१५॥
न हि निजजाठरवह्नेर्[12]जयाय मत्पूर्वजार्जितोऽसि त्वम् ।
किन्त्वज्ञालससन्ततिसन्ततपीडापरम्पराशान्त्यै ॥१६॥
चित्तचमत्कृतिकारणमिदमिह तावद् भवत्सुकाठिन्यम् ।
तदनु च सेवकलोके लोकेश कथं कठोरतां यासि ॥१७॥
अङ्के तव गतपङ्के लङ्केशरिपोऽतिपोष्यमासीनम् ।
त्वन्मुखसौरभचर्चि[13]ततताम्बूलाशं शिशुं प्रभो पाहि ॥१८॥
[14]चिबुकं [15]संमुख[16]तायै करेण कर्षन्तमर्भकं मातः ।
सिन्दूराचलवासिनि मामिह रामाभिधे पाहि ॥१९॥
[17]उचिता ह्यधृष्यता ते प्रत्यर्थिनृपेषु नार्भके[18]ऽपि मयि ।
वत्सलताधृष्यतयोर्गोव्याघ्रस्येव वर्तते वैरम् ॥२०॥

---

9. In D this आर्या is written before the 9th आर्या; but is given the correct number (i. e. 10). 10. रथैरुपयाति BD. 11. °शः B. 12. °ह्वि° B. 13. °चर्वित° B [But here also the scribe had originally written चर्चित which is later on corrected into चर्वित by the same hand]. 14. This आर्या is 20th in A. 15. चुबुकं AB. 16. सन्मुख° D. 17. This आर्या is 19th in A. 18. °के तु A.

पितरौ यत्र विभिन्नौ तत्रान्यतरेण जीवनं हि शिशोः ।
उभयं त्वमेव मे तत् त्वयि निष्करुणे करोमि किं राम ॥२१॥

न शृणोषि दीनभाषितमिति[19] सर्वज्ञे न शक्यते वक्तुम् ।
श्रुत्वा स्थितोऽसि तूष्णीमित्यपि वचनं दयानिधौ निन्द्यम् ॥२२॥

किं वा तद् [गुरु] कार्यं यद्व्यासङ्गेन जानकीजाने ।
दीनानि मे वचांसि प्रकटं नायान्ति कर्णमार्गं ते ॥२३॥

प्रायो राक्षसयुद्धे श्रान्तः शेषेऽनिशं सुखं शेषे[20] ।
यज्जल्पतो भृशं मे करुणानि वचांसि नावधारयसि ॥२४॥

अपि दलति वज्रहृदयं मद्वचनैः[21] रोदितीव पाषाणः ।
किं वा मयापराद्धं यत् करुणाब्धिर्भवानुदासीनः ॥२५॥

जल्पन्तमल्पबुद्धिं पश्यन्तस्त्वत्कृपामपश्यन्तः ।
मामुपहसन्ति लोकाः शोकारे राम तत्तवाश्लाघ्यम्[22] ॥२६॥

क्षीरेण दग्धजिह्वस्तक्रं फूत्कृत्य पामरः पिबति ।
दम्भिनमवलोक्य जनस्तद्वन्मां शङ्कते[23] त्वया त्यक्तम् ॥२७॥

मयि करुणामृदुभावाद् यदि नाभीष्टं करोषि मा कुरु तत् ।
सुस्वामिभावमीश स्वीयं[24] प्रकटीकुरुष्व दाशरथे ॥२८॥

पायस पयस ? इव राम सर्पिर्भस्मनि निहितं करोति[25] किं नाम ।
तद्वत् तव मन्त्रजपः पापिनि मयि किं करोति[26] वाभीष्टम् ॥२९॥

सन्तप्तायसपिण्डे वार्यपि भस्मीभवत्युपक्षिप्तम् ।
नित्याशौचे तद्वन्मयि मन्त्रजपोऽपि भस्मसाद् भवति ॥३०॥

मालिन्यदोषभीत्या पृथग्विधेयं नु माषराशेः किम् ।
मत्तः शरीरपापात् पापं किं वा जपः करोति[27] पृथक् ॥३१॥

मा कुरु साहसमित्थं जल्पन् पक्षी भिनत्ति पाषाणम् ।
तद्वत् सहजैर्दोषैः पापं निन्दामि राम कुर्वे च ॥३२॥

---

19. °भाषा° A. 20. शेषैः B. 21. °चनेन C. 22. °त्तव श्ला° B. 23. जनं AB. 24. स्वस्वामि° D. 25. करोतु A. 26. करोतु AD. 27. करोतु A.

मृगमदभूमौ जनितो जहाति दोषं निजं पलाण्डुः किम् ।
तद्वत् तव दासोऽहं त्यजामि दोषं न जातु देवेश ॥३३॥
सुकृतिन ईषत्पापे प्रायश्चित्तं रघूत्तम प्रोक्तम् ।
अपयाति मामुदीक्ष्य[२८] प्रायस्तदपीह[२९] गौरिव व्याघ्रम् ॥३४॥
परिगणना भगणानां भविता यदि वा समन्ततोऽणूनाम्[३०] ।
राघव पापचयानां[३१] न मत्कृतानां भवेदियं क्वचन ॥३५॥
सर्वज्ञता श्रुता ते सत्यं वद राम किङ्करोऽहं ते ।
मत्कृतदुष्कृतसंख्यां यथार्थतो वेत्सि किं न वा वेत्सि ॥३६॥
अपराधिनमपराधिनमपराधिनमर्भकं[३२] रघूत्तम माम् ।
पालय पालय पालय जननि श्रीराम नार्थये किञ्चित् ॥३७॥
उचितं वक्तुभद्रं न हि नाथे त्वय्यनाथ इति वाक्यम् ।
जिह्रेम्युपेक्षितोऽहं सीतानाथ त्वया सनाथ इति ॥३८॥
क्रोशन्तं दीनास्यं पशुरप्युपयाति गौर्निजं वत्सम् ।
ईदृङ्मदीयभाग्यं[३३] सर्वविदपि वेत्ति मत्कृपां न भवान् ॥३९॥
सर्वज्ञः स्वाधीनो दयालुरभिधेहि मयि कथं कठिनः ।
इति[३४] पृष्टो दास्यसि किं विनेश्वरत्वं ममोत्तरं राम ॥४०॥
अपराधमार्गणे च[३५] क्वचिदपि करुणा तवोचिता नैव[३६] ।
न हि कश्चित् संसारी गतापराधोऽस्ति वल्लभेषु तव ॥४१॥
तस्य स्वल्पोऽपराधो मम पुनरधिक इति प्रमाता कः ।
अहमिति चेदभ्यस्ता[३७] त्वयेश[३८] सर्वज्ञता[३९] तदर्थं[४०] किम् ॥४२॥
अग्रजजायामिच्छल्यग्रजवधलालसान्तरात्मनि च ।
या करुणा सुग्रीवे राघव सा ते कथन्तरामुचिता ॥४३॥

---

28. °क्ष्व (scratched out and replaced by क्ष्य) B. 29. The original reading is तदपि and some other hand has supplied ह above the line, but without lengthening the vowal of पि. B. 30. °नूनाम् B. 31. न मत्कृतानां पापचयानां A. 32. °धीनं B. 33. कीद्दृ° (corrected into ईद्दृ° by some other hand) C. 34. यदि BC. 35. तु A. 36. नैवम् B. 37. °क्ष्यस्ता B. 38. त्वयैव (marginally corrected into त्वयेश) C. 39. सर्वज्ञते A. 40. मदर्थं C.

भ्रातुरवज्ञामात्रात् सन्तापितृवैरवह्निनेव जवात् ।[41]
स्वसमीपमागतेऽस्मिन् बिभीषणे क्वास्ति निरपराधत्वम् ॥४४॥[42]
आस्तामेतदसभ्यं परदोषगवेषणं परोक्षेऽद्य ।[43]
ईदृशि भवतश्चरिते बिभीषणाद्यैस्तु किमपराद्धं मे ॥४५॥[44]
जल्पति कल्पय मोघैः पौरोभाग्यं मयि क्षमासिन्धो ।[45]
सन्तप्तचित्तभावाद् दुरुक्तमुक्तं यदुत्तमश्लोक ॥४६॥
स्वीयमणौ गुणहीने को वा कलहः परीक्षकेण सह ।
त्वयि यादृच्छिककृत्ये भृत्येन सहेर्ष्यया भवेत् किं मे ॥४७॥[46]
वक्तव्यमेतदुक्तं तवाग्रतो राम यच्च यावच्च ।
यद्यद्याप्यसि रुष्टस्तन्ननु पतितोऽस्मि पादयोरुपरि ॥४८॥
प्रणिपातमात्रनीराच्छाम्यति कोपाशुशुक्षुणिर्महताम् ।
मम दुरितस्य विपाकैः राघव नाद्यापि मुक्तकोपोऽसि ॥४९॥
त्वत्तुल्यो नास्ति विभुर्मत्तुल्यो नास्ति चापरो दीनः ।
दीनानाथैकबन्धो करुणासिन्धो ब्रुवेऽहमन्यत् किम् ॥५०॥
देवे स्वयम्प्रकाशे त्रिभुवनभवनं त्वयि प्रकाशयति ।
करुणां पश्यामि नो चेदन्धो वाहं न वास्ति[47] सा भवति ॥५१॥
नाभीष्टं करुणातः करोषि यदि राम सापराधस्य ।
मज्जल्पकल्पितेन स्वान्तोद्वेगेन किं न वा कुरुषे ॥५२॥
अरयोऽपि वैरभावादिष्टं भवतोऽलभन्त एवाशु ।
दासस्य मे दयालो प्रार्थितदानेऽसि[48] कथमुदासीनः ॥५३॥
नादत्तं दत्से[49] चेत् कस्मै दत्ता बिभीषणेन पुरी ।
किष्किन्धाराज्यं वा कपिना दत्तं भवान्तरे कस्मै ॥५४॥
श्रीदामतो गृहीताः पृथुकाश्चेत् किं त एव नो दत्ताः ।
ऐन्द्रं पदमिह तस्मै दत्तं तत् केन तस्य कृत्येन ॥५५॥

---

41. सत्रापितृ° BC. 42. °पराधित्वम् C. 43. This आर्या is 46th in A. 44. °तच्चरिते B. 45. This आर्या is 45th in A. 46. मासु A. 47. सास्ति वा A. 48. °दानेषु B. 49. दित्ससि A.

उन्मोचितो गजेद्रो मदान्धदृष्टिश्च[50] तिर्यगुद्भूतिः ।
दाता सेवककुलजः पाताले च त्वया बलिर्बद्धः ॥५६॥
उद्वृत्तचित्तवृत्तिरुत्तमलोके स्थितिर्दशास्यस्य ।
दशरथसंज्ञस्य विभोः कल्पित उच्चैस्तरामधःपातः ॥५७॥
सुग्रीवबिभीषणयोस्तूष्णीं स्थितयोरभूत् परं राज्यम् ।
सर्वेशाभिषिक्ते प्रसन्नता वायुनन्दने मौनम् ॥५८॥
यद्यत् करोषि चेत्तन्महेश्वरत्वेन[51] शोभते भवतः ।
आस्तां तन्नतु सकलं सकलं[52] किमपीह पाहि मां राम ॥५९॥
चेलाञ्चले[53] धृतोऽसि प्रसभं कुत्रापयास्यसि स्वैरम् ।
कुरु वा जीवनवृत्तिं वद वा व्यवहारमीड्यलोकेषु ॥६०॥
त्वं मम जननी जनकस्त्वमेव बन्धुः कुलं च शीलं च ।
त्वयि निष्ठुरतां याते[54] तृणमपि वज्रायते[55] मयीशान ॥६१॥
कृपया[56] द्रक्ष्यसि मां चेत् तृणाय मन्ये हि[57] कालमप्युच्चैः ।
अकृपा चेत् तव राम प्रायस्तृणमेव कालरूपं मे ॥६२॥
अथवाहो किं बहुना धाष्ट्यं किमिहोचितं प्रभोः पुरतः ।
जन्मप्रबन्धसिद्धा ह्याधीनां[58] यान्ति मूलतां दोषाः[59] ॥६३॥
नाराधितोऽसि पूर्वं क्वचिदपि नाराधयामि चेदानीम् ।
इच्छामि च[60] स्वमिष्टं कष्टं हा मूढतैव मे बाढम् ॥६४॥
दुर्वृत्तं[61] दुर्बुद्धिं कामादिवशं पराङ्मुखं[62] भवति ।
पालयसि मां यदेषा राघव भवतः क्षमोच्चकैर्जयति ॥६५॥
रचितापराधजाले मयि सदयोऽसीति वेद्म्यनेनैव ।
मुखतो निरङ्कुशा मे रामेति यतः प्रवर्तते वाणी ॥६६॥

---

50. °स्तु BC. 51. चैतन्म° AC. 52. सकलङ्कमीह A. 53. चैला° B. 54. This आर्या is 62nd in A. 55. ऋण° B. 56. This आर्या is 61st in A. 57. न A.; B reads तृणाय मन्यः काल° which seems to justify the reading हि instead of न. 58. आधीनां A. 59. दोषः B. 60. चेत् B. 61. दुर्वृत्ति B. 62. जयति (which is, however, scored out and corrected into भवति by another hand) C.

नैवास्ति तेऽनुकम्पा यस्मिंस्तस्यास्यतः कथङ्कारम् ।
किल्बिषमुद्राभाजो रामेति निरामयं वचः[६३] प्रसरेत् ॥६७॥
तृष्णाव्यालविषार्तं धनधनशब्दैः[६४] पतन्तमूर्व्यां माम् ।
गरुडध्वज गुरुतापं जीवनदानेन पाहि रक्षाव[६५] ॥६८॥
तृष्णानिदाघतप्तं शुष्यत्कण्ठं निराश्रयं दीनम् ।
करुणाकटाक्षवृक्षच्छायामच्छां विधेहि[६६] मां पाहि ॥६९॥
तृष्णाकल्लोलवती[६७] विशालकल्लोलसङ्कुलीभूतम् ।
करुणापाङ्गनिरीक्षणगुणजालैः[६८] कर्ष मां प्रकर्षेण ॥७०॥
तृष्णासुकेतुकन्याभीतं त्वां[६९] राम[७०] शरणमापन्नम् ।
विश्वामित्रमिवोच्चैर्विश्वार्तिविनाशनाशु[७१] मां पाहि ॥७१॥
तृष्णासुबाहुमुख्यक्षपाचरव्रातविघ्नितं[७२] वीर ।
गाधिजमुनिमखमिव[७३] मां रक्षोरे रक्ष जानकीजाने ॥७२॥
पाषाणतां[७४] प्रयातं मुनिशापेनेव[७५] पूर्वपापेन ।
मत्तनुशल्यमहल्यातुल्यतया[७६] कलय रचय कल्याणम् ॥७३॥
अधरितकोटियुगान्तं[७७,७८] बद्धगुणं राम[७९] पापमस्माकम् ।
अण्डजमण्डनवाहन खण्डय चण्डीशचापदण्डमिव ॥७४॥
निर्भूपीकृतभूतलमर्जुनयशसोऽन्तकं[८०] सुकम्पस्य ।

---

63. वचः omitted AB; while C adds कथं after वचः. 64. पतन्तिमू° B. 65. रक्षोरे BC; In A also रक्षोरे, the originally written letters, have been corrected in the margin into रक्षाव. 66. विधाय A. 67. °वीचि° A; °वोचो° C. 68. निरीक्षित° (which is later corrected into निरीक्षण in the margin by the same hand) C. 69. This आर्या is 73rd in A. 70. राम omitted AC. 71. विश्वार्तिविनाशु B. 72. This आर्या is 71st in A. 73. कौशिक° marginally noted instead of गाधिज which is written and then cancelled by the scribe himself. 74. This आर्या is 74th in A. 75. °शापेनैव BC 76. मत्तनुशिला° A. 77. This आर्या is 75th in A. 78. राम पापचाप° A. [But the letters चा and प are later on cancelled]. 79. अधिगतकोटि° A. 80. This आर्या is 76th in A.

कुरु दैन्यमेलकं[८१] मे कुण्ठितगतिमीश जामदग्न्यमित्र ॥७५॥

मृगजलबुद्धिसमृद्धं[८२] निदाघतप्तं नमेरुणा[८३] पूर्णम् ।

वनमिव मानसमुच्चैः प्रविश रघूत्तंस सप्रियावरज[८४]ः ॥७६॥

सरयूतीरपुरेशे[८५] सुरेशगिरिशादिपूज्यपादपीयूषे ।

वैदेहीहृदयेशे मम भक्तिरिहास्तु मानुषे वेषे[८६] ॥७७॥

स्मेरमुखाम्बुजमुद्यन्नवनीरदनीलमिन्दिरागेहम्[८८] ।

परिहरतु दुःखजालं[८९] तेजः किमपीनवंशसम्भूतम्[९०] । ॥७८॥

धनुषा रिपुजयजनुषा रुचिरतराकारनिर्जिताम्बुधरा[९१] ।

तरुणारुणानिभचरणा काचन करुणा रुणद्धि मे हृदयम् ॥७९॥

दशरथनन्दननामा[९२] चन्दनधामाभिनन्दनो नमताम्[९३] ।

मदयतु मदीयमुदितः कश्चन मोदो हृदन्तरं दान्तम् ॥८०॥

पत्तिः[९४] शरधनुराढ्या[९५] सम्पत्तिर्योगयोगिनामीड्या ।

स्फुरति[९६] क्षपितविपत्तिः काचन वित्तिर्ममानिशं[९७] चित्ते ॥८१॥

रामाभिधाभिरामा[९८] श्यामा मे मानसं समासाद्य ।

मैत्री कापि धरित्रीपुत्री प्राचीनधर्मलब्धास्ते ॥८२॥

हीरमनोहरदशना[९९] दशशतकरवंशभूषणं रचना ।

काञ्चनकाचमणीनां[१००] नीला लीलालसं[१०१] मनः कुरुते ॥८३॥

तूणीकवचकृपाणीविशिखासनबाणमञ्जुलायान्ती[१०२] ।

वेणी कापि गुणानामेणीदृगुपान्तचारिणी जयति ॥८४॥

---

81. दैन्यमैच्छकं A. 82 This आर्या is 77th in A. 83. प्रवृद्धं B. 84. °वरज C. 85. This आर्या is 88th in A. 86. वेशे B. 87. This आर्या is 87th in A. 88 °मुद्यन्नीरदनीलाभ° A. 89. °जातं BC. 90. °त C. 91. This आर्या is 108th in A. 92. This आर्या is 89th in A. 93. महताम् BC. 94 This आर्या is 96th in A. 95. °धनुषाढ्या BC; °धनुराज्यः A. 96. स्फुरतु B. 97. वित्ति° AB. 98 This आर्या is 90th in A. 99. This आर्या is 97th in A. 100. का चन° A. 101 नीलालसं A.
102. this आर्या is 98th in A

[103]आननननिर्जितचन्द्रा सान्द्रानन्दैकभूमिरुन्निद्रा ।
रमयति विगलिततन्द्रा रावणविद्राविणी मुद्रा ॥८५॥

[104]वामे काञ्चनवल्ली सल्लीलोऽन्यत्र काञ्चनो विटपी ।

[105]विलसतु मानसकमले मध्ये हारिनीलकन्दलोद्रेकः ॥८६॥

[106]वामाङ्गसङ्गिविद्युन्मालं नीलं विलङ्घितानङ्गम् ।
दशरथपूर्वजपुण्यं पश्यत पीयूषपूरितापाङ्गम् ॥८७॥

[107]अभिनवपल्लवशयनां शयनान्तनिविष्टविद्युदुल्लासाम् ।
काञ्चननिकुरुम्बाङ्कस्थितशिरसं काञ्चिदर्थये[108] लीलाम् ॥८८॥

[109]अकपटपटुकपिकटकां नटकामितयामिनीतवैक्लव्याम् ।
तदुचितमुपचारचयं रचयन्तीं[110] काञ्चिदर्थये मायाम् ॥८९॥

[111]अम्बरमणिकुलभूषां शम्बररिपुवैरिभक्तिमज्जूषाम् ।
कामपि कामपिकानां रसाललतिकानां निकाममवलम्बे ॥९०॥

[112]अनिलतपःफलमग्रे पृष्ठे स्नेहं सचामरच्छत्रम् ।
पार्श्वे भक्तिविशेषौ मध्ये तडिदम्बुदावहं[113] वन्दे ॥९१॥

[114]सुरसरिदवरजचञ्चच्चामरकरसोदरानुगतम् ।
किञ्चिदुदञ्चितचम्पक[115]चैलं शैलं सुनीलमवलम्बे ॥९२॥

[116]आकर्णकृष्टचापं वर्षन्तं बाण[117]वृष्टिमुत्तापम् ।
वन्दे योगिदुरापं कञ्चन हुङ्कारसुन्दरं कोपम् ॥९३॥

---

103. This आर्या is 99th in A. 104. This आर्या is 94th in A. 105. °ति A. 106. This आर्या is 91st in A. 107. This आर्या is 101st in A. 108. °र्थयेल्लीलाम् A. 109. This आर्या is 103rd in A. 110. रचयति B. 111. This आर्या is 104th in A. 112. This आर्या is 92nd in A. 113. °तडिदम्बुदाभं मुदा वन्दे A. 114. This आर्या is 105th in A. 115. °ञ्चितचञ्चच्चम्पकशैलं सुनील° A. 116. This आर्या is 106th in A. 117. The original reading in A is मुत्ताषु; but some reader has cancelled ष and the line of त्ता and added the letters मांगे in the space below these letters. This reading then would be °त्तमाङ्गे which evidently is wrong as shown by metre.

११८ पाथोधिबद्धसेतुं नक्तंचरनाशपिशुनसत्केतुम् ।
११९ आपदमन्तं नेतुं कञ्चिच्चिन्मोदकन्दलं वन्दे ॥९४॥
१२० इन्दीवरदलनयनं जलदावलिमज्जुमज्जुलापाङ्गम् ।
मन्दीकृतदशवदनं तं दीनमहोदयं जयं वन्दे ॥९५॥
१२१ खण्डितहरकोदण्डा ब्रह्माण्डकरण्डमण्डनीभूता ।
१२२ १२३ वैदेहीगलमाला विलसतु लीलाविलासवती ॥९६॥
१२४ किं तव सुतधनजायामायामयरूपचिन्तयाप्यनया ।
अनपायानन्दमये किमये रमसे न राघवे चेतः ॥९७॥
१२५ आपदि मां स्मरतीति प्रायो न करोषि सम्पदं मम चेत् ।
१२६ स्मृत्या मदीयया ते भविता किमिवाधिकं रघूत्तंस ॥९८॥
१२७ १२८ अपनय दैन्यमुदग्रं परिहर चिन्ताचयं समग्रं मे ।
त्वन्मुखवीक्षाभिन्नं यत्नं न करोमि कर्हिचिद् राम ॥९९॥
१२९ १३० मम नाशयाधिवार्धिं क्षमस्व विविधापरापधसम्बन्धम् ।
शरणागतजनवत्सल राघव शरणागतोऽस्मि ते दासः ॥१००॥
१३१ दशशतकरवंशभवे दशरथपृथ्वीशपूर्वपुण्यौघे ।
दशवदनान्तकरूपे चेताश्चिरमास्स्व राघवे भूपे ॥१०१॥
१३२ त्यज निजगजवाजिकथां भज भज जठरे जगद् वहन्तमजम् ।
१३३ तत्प्राप्त्या ननु चेतः प्राप्स्यसि सकलं न वैपरीत्येन ॥१०२॥
१३४ हितमात्रं वाञ्छसि चेत् तन्मञ्जूषां गृहाण रामाख्याम् ।
१३५ नो चेच्चञ्चलशीलैर्वञ्चितमसि चित्त दुर्लभैर्विषयैः ॥१०३॥

---

118. This आर्या is 100th in A. 119. कञ्चिन्मोद° A. 120. This आर्या is 93rd in A. 121. Tihs आर्या is 107th in A. 122. °ति A. 123 नीला A. 124. This आर्या is 82nd in A. 125. This आर्या is 78th in A. 126. किं वा° A. 127. This आर्या is 79th in A. 128. A originally reads दैत्य and has the letter त्य above न्य which, however, is not scored out. 129. This आर्या is 80th in A. 130. °सम्बद्धम् A. 131. This आर्या is 81st in A. 132. This आर्या is 83rd in A. 133. °प्त्यैव तु° A. 134 This आर्या is 84th in A. 135. चञ्चलैः A; In C also the original दुर्लभैः is cancelled and दुर्जयै is supplied in the margin.

[136]कर्तुमकर्तुं शक्तः [137]सर्वं जगदेतदन्यथा कर्तुम् ।
युक्तं विहाय रामं कामं मा धेहि मानसान्यस्मिन् ॥१०४॥

[138]दारिद्र्यदावशान्त्यै [139]वर्षतु करुणाकटाक्षनीराणि ।
नित्याङ्कस्थितविद्युत् [140]कश्चन वैकुण्ठमण्डनो[141] मेघः ॥१०५॥

[142]कमलायमाननेत्राममलायतबाहुसङ्गिकोदण्डाम् ।
शमलावण्यधरित्रीं जननीं पुंवेशधारिणीं वन्दे ॥१०६॥

[143]कुटिलाशयविषवल्लीं जटिलां निटिलोल्लसच्छ्मास्बुकणाम् ।
वल्कलकल्पितवसनां रावणवधवासनां मुदा वन्दे ॥१०७॥

[144]तृष्णानक्रविकृष्टं [145]कष्टं प्राप्तं चिराय देवेश ।
करुणार्द्रचित्तावृत्ते गजेन्द्रमिव मां समुद्धर प्रीत्या ॥१०८॥
समुद्रवसनावर्तिविद्वन्मण्डलमूर्तिना ।
आर्या विरचिताः श्रीमन्महामुद्गलसूरिणा ॥१०९॥

[146]इति श्रीमदखिलपण्डितालङ्कारश्रीरामचन्द्रानुचरमहामुद्गलभट्टविरचितं
[147]श्रीरामार्याष्टोत्तरशतं सम्पूर्णम् ॥

---

136. This आर्या is 85th in A. 137. सकलं A. 138. This आर्या is 86th in A. 139. C originally has वह्नि which is marginally corrected into दाव, 140. C originally has कश्चिद् which is marginally corrted as कश्चन. 141. °मण्डनं A. 142. This आर्या is 95th in A. 143. This आर्या is 102nd in A. 144. This आर्या is 72nd in A. 145. °विर्णं BC. 146. A reads इति श्रीमहामुद्गलाचार्यविरचितं. 147. श्रीरामार्याशतमष्टाधिकं A; आर्याष्टोत्तरशतं B. 148. समाप्तं । लेखकपाठकयोः शुभं भवतु ॥

INDEX

[Figures indicate the number of the आर्या in the text]

अकपटपटु ०८९
अग्रजजायामिच्छ० ४३
अङ्क तव गतपङ्के० १८
अथवाहो किं बहुना० ६३
अधरितकोटियुगान्तं० ७४
अनिलतपःफलमग्रे० ९१
अनुचितमिदमेवादौ० ७
अपनय दैन्यमुदग्रं० ९९
अपराधमार्गणे० ४१
अपराधिनमपराधिन० ३७
अपि दलति वज्रहृदयं० २५
अपि रङ्कमङ्कनिष्ठ० ५
अभिनवपल्लव० ८८
अम्बरमणिकुलभूषा० ९०
अयि वद० १०
अरयोऽपि वैरभावात्० ५३
अर्थिनि विलसति लिप्सा० ४
आकर्णकृष्टचापं० ९३
आननर्निजितचन्द्रा० ८५
आपदि मां स्मरतीति० ९८
आशापाशनिबद्धं० ६
आस्तामेतदसभ्यं० ४५
इन्दीवरदलनयनं० ९५
उचितं कर्तुं० ३८
उचिता ह्यधृष्यता ते० २०
उदवृत्तचित्तवृत्ति० ५७
उन्मोचितो गजेन्द्रो० ५६
कमलायमाननेत्रा० १०६
करुणाकर इत्याद्या० १२
कर्तुमकर्तुं शक्तः० ९०४
किं तव सुतधन० ९७
किं वा तद् गुरु० २३
कुटिलाशयविषवल्लीं० १०७
कुरु वा राघव० १३
कृपया द्रक्ष्यसि० ६२
क्रोशन्तं दीनास्यं० ३९
क्षीरेण दग्धजिह्व० २७
खण्डितहरकोदण्डा० ९६
चित्तचमत्कृतिकारण० १७
चिबुकं संमुखतायै० १९
चेलाञ्चले धृतोऽसि ६०
जल्पति कल्पय मोचै० ४८
जल्पन्तमल्पबुद्धिं० २६
जानाति भूपमल्पो० ३
तस्य स्वल्पोऽपराधो० ४२
तूणीकवचकृपाणी० ८४
तृष्णाकल्लोलवतीं० ७०
तृष्णानक्राविकृष्टं० १०८
तृष्णानिदाघतप्तं० ६९
तृष्णाव्यालविषार्तं० ६८
तृष्णासुकेतुकन्या ० ७१
तृष्णासुबाहु० ७२
त्यज निजगजवाजि० १०२
त्रिभुवनपालनदीक्षित० ८
त्वत्तुल्यो नास्ति विभुः० ५०
त्वं मम जननी० ६१
त्वयि विमुखे ० १
दशरथनन्दननामा० ८०
दशशतकरवंशभवे० १०१
दारिद्र्यदावशान्त्यै० १०५
दुर्वृत्तं दुर्वुद्धिं० ६५
देवे स्वयंप्रकाशे० ५१
धनुषा रिपुजय० ७९
न शृणोषि दीन० २२
न हि निजजाठर० १६
नादत्तं दत्से चेत् ० ५४
नाभीष्टं करुणातः० ५२
नाराधितोऽसि० ६४
निर्भूपीकृत० ७५
नैवास्ति० ६७
पत्तिः शरधनु० ८१
पश्यस इव राम० २१
परिगणना भग० ३५
परितः पश्यसि० २
पाथोधिबद्धसेतुं० ९४
पाषणतां प्रयातं० ७३
पितरौ यत्र विभिन्नौ० २१
प्रणिपातमात्रनीरा० ४९
प्रायो राक्षसयुद्धे० २४
भ्रातुरवज्ञामात्रात्० ४४
मम नाशयाधि० १००
मयि करुणा० २८
मा कुरु साहस० ३२
मामिह कृपणमनाथं० ११
मालिन्यदोषभीत्या० ३१
मृगजलबुद्धि० ७६
मृगमदभूमौ० ३३
यदि पुनरप० ९
यद्यत् करोषि० ५९
रचितापराधजाले० ६६
रामाभिधाभिरामा० ८२
वक्तव्यमेतदुक्तं० ४८
वामाङ्गसङ्गिविद्युत्० ८७
वामे काञ्चनवल्ली० ८६
श्रीदामतो गृहीता० ५५
संतप्तायसपिण्डे० ३०
समुद्रवसनावर्तिं० १०९
सरयूतीरपुरेशे० ७७
सर्वज्ञः स्वाधीनो० ४०
सर्वज्ञता श्रुता ते० ३६
सुकृतिन ईषन्पापे० ३४
सुग्रीवबिभीषणयोः० ५८
सुरसरिदवरज० ९२
सेवकवंशभवत्वा० १५
सेवामपेक्ष्य दाता० १४
स्मेरमुखाम्बुज० ७८
स्वीयमणौ गुणहीने० ४७
हितमात्रं वाञ्छसि० १०३
हीरमनोहरदशना० ८३